# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College affiliated to University of Calcutta)

**M.A./M.Sc. SECOND SEMESTER EXAMINATION, MAY 2014**

**FIRST YEAR**

**SANSKRIT**

Date : 31/5/2014

Time : 11 am – 3 pm

Paper : V

Full Marks : 100

**[Use a separate Answer Book for each Group]**

## Group – A

1. अधोलिखितयो: यथेच्छ**मेकस्य** प्रश्नस्य उत्तरं प्रदेयम्। [1×15]
   क) सामान्यलक्षणं प्रतिपदव्यावृत्तिप्रदर्शनपुर:सरं विचार्य जातिबाधकविषये लघ्वी टिप्पणी टीकनीया। [7+8]
   ख) न्यायवैशेषिकाभ्युपगतेषु पदार्थेषु विशेषस्य लक्षणं प्रतिपादनीयम्। तस्य स्वीकारे का युक्ति: ? [7½+7½]

2. यथेच्छ**मेकस्मिन्** विषये टीका टीकनीया। [1×5]
   क) प्रागभाव:।
   ख) व्याप्ति:।

3. यथाभिमतं **दशानां** प्रश्नानामुत्तरं प्रदेयम्। [10×1]
   क) 'संसारमहीरुहस्य बीजाय'– इत्यत्र क: समास: ?
   ख) 'नूतनजलधररुचये'– इत्यस्य अर्थ: क: ?
   ग) कानि कर्माणि ?
   घ) समवायविषये भाषापरिच्छेदे का कारिका उपलभ्यते ?
   ङ) पीलुपाकशब्दस्य कोऽर्थ: ?
   च) पारिमाण्डल्यं नाम किम् ?
   छ) अन्यथासिद्धिशब्दस्य कोऽर्थ: ?
   ज) 'क्षित्यादीनां नवानान्तु द्रव्यत्वगुणयोगिता' इत्यस्य अर्थ: क: ?
   झ) आत्मन: विशेषगुणा: के ?
   ञ) किं नाम निर्विकल्पप्रत्यक्षम् ?
   ट) को नाम परामर्श: ?
   ठ) अलौकिकसन्निकर्षस्य कति भेदा: ?
   ड) का नाम लक्षणा ?
   ढ) को नाम शाब्दवोध: ?
   ण) अतिदेशवाक्यं नाम किम् ?

4. यथेच्छ**मेकस्यो**त्तरं विधेयम्। [1×10]
   क) 'योगश्चित्तवृत्तिनिरोध:' – इत्यस्य अर्थ: विशदीक्रियताम्।
   ख) योगशास्त्रे किं नाम तत्त्वम् अतिरिक्ततया सांख्यशास्त्रत: अङ्गीकृतम् ? तस्य लक्षणं परिष्कृत्य तत्स्वीकारे का युक्तिरिति लेख्यम्। [1+6+3]

5. यथाकामम् **एकस्य** उत्तरं प्रदेयम्। [10]
   क) को नाम गुणविधि: ? 'सोमेन यजेत' इत्यत्र गुणविधिर्विशिष्टविधिर्वेति युक्त्या विचार्यताम्।
   ख) मीमांसामते धर्मस्य किं लक्षणम् ? किमनेन लक्षणेन सह जैमिनिकृतलक्षणस्य कोऽपि विरोधोऽस्ति नास्ति वा ?

## **Group – B**

6. लक्षणोदाहरणाभ्यां यथामति **चतुर्णाम्** अलंकाराणाम् आशयो विशदीक्रियताम्। [4×5]

क) वक्रोक्तिः।

ख) लाटानुप्रासः।

ग) उत्प्रेक्षा।

घ) व्यतिरेकः।

ङ) अर्थान्तरन्यासः।

च) तुल्ययोगिता।

7. अधोलिखितयोः **एकस्य** प्रश्नस्योत्तरं प्रदेयम्। [10]

क) को नाम अभाववादः ? तस्य कति मतभेदाः आनन्दवर्धनेन कल्पिताः ? तेषु कोऽपि एको व्याख्यायताम्।

ख) प्रतिपदव्यावृत्तिपूर्वकं ध्वनेर्लक्षणं विशद्यताम्।

8. अधःस्थेषु स्वाभिमतानां **दशानां** प्रश्नानाम् उत्तरं प्रदीयताम्। [10×1]

क) ध्वन्यालोकग्रन्थस्य कति उद्द्योताः सन्ति ? तत्र प्रथमोद्द्योतस्य प्रतिपाद्यविषयः कः ?

ख) आनन्दवर्धनेन काव्यस्यात्मतया किं प्रतिपादितम् ?

ग) भाक्तमिति किमवगम्यते ?

घ) काव्यस्य चारुत्वहेतुरूपेण अभाववादिभिः के विषया उपन्यस्ताः ?

ङ) तस्मात् प्रवादमात्रं ध्वनिरिति वचनं केन कथितम् ? वचनस्य क आशयः ?

च) ध्वनेः स्वरूपं केनोपमीयते ?

छ) वाच्यार्थ इति कस्यार्थस्य प्रतीतिः ?

ज) प्रतीयमानार्थस्य सादृश्यं कुत्र लभ्यते ?

झ) प्रतीयमानार्थस्य कति भेदाः ? नामानि उल्लेखनीयानि।

ञ) वस्तुध्वनेः कति भेदा ग्रन्थकारेण प्रदर्शिताः ? तेषां यथेच्छमेकं लिखत।

ट) आदिकवेः श्लोकस्य हेतुः कः ?

ठ) प्रतिभेति पदेन किमवगम्यते ?

ड) आनन्दवर्धनेन कति महाकवयः गण्यन्ते ? यथेच्छमेकस्य नाम लेखनीयम्।

ढ) 'उपसर्जनीकृतस्वार्थौ' – इति कयोरुल्लेखः ?

ण) ध्वन्यालोककारमतेन भक्तेः स्वरूपं किम् ?

9. अधोलिखितस्य प्रश्नस्योत्तरं प्रदीयताम्। [1×10]

भारतीयसाहित्यचर्चायां संस्कृतस्य प्रभावो विव्रियताम्।